# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ३२

ततस्ते राक्षसास्तत्र गत्वा रावणमन्दिरम् ।
न्यवेदयन्पुरीं रुद्धां रामेण सह वानरैः ॥ १॥

रुद्धां तु नगरीं श्रुत्वा जातक्रोधो निशाचरः ।
विधानं द्विगुणं श्रुत्वा प्रासादं सोऽध्यरोहत ॥ २॥

स ददर्शावृतां लङ्कां सशैलवनकाननाम् ।
असङ्ख्येयैर्हरिगणैः सर्वतो युद्धकाङ्क्षिभिः ॥ ३॥

स दृष्ट्वा वानरैः सर्वां वसुधां कवलीकृताम् ।
कथं क्षपयितव्याः स्युरिति चिन्तापरोऽभवत् ॥ ४॥

स चिन्तयित्वा सुचिरं धैर्यमालम्ब्य रावणः ।
राघवं हरियूथांश्च ददर्शायतलोचनः ॥ ५॥

प्रेक्षतो राक्षसेन्द्रस्य तान्यनीकानि भागशः ।
राघवप्रियकामार्थं लङ्कामारुरुहुस्तदा ॥ ६॥

ते ताम्रवक्त्रा हेमाभा रामार्थे त्यक्तजीविताः ।
लङ्कामेवाभ्यवर्तन्त सालतालशिलायुधाः ॥ ७॥

ते द्रुमैः पर्वताग्रैश्च मुष्टिभिश्च प्लवङ्गमाः ।
प्रासादाग्राणि चोच्चानि ममन्तुस्तोरणानि च ॥ ८॥

पारिखाः पूरयन्ति स्म प्रसन्नसलिलायुताः ।
पांसुभिः पर्वताग्रैश्च तृणैः काष्ठैश्च वानराः ॥ ९॥

ततः सहस्रयूथाश्च कोटियूथाश्च यूथपाः ।
कोटीशतयुताश्चान्ये लङ्कामारुरुहुस्तदा ॥ १०॥

काञ्चनानि प्रमृद्नन्तस्तोरणानि प्लवङ्गमाः ।
कैलासशिखराभानि गोपुराणि प्रमथ्य च ॥ ११॥

आप्लवन्तः प्लवन्तश्च गर्जन्तश्च प्लवङ्गमाः ।
लङ्कां तामभ्यवर्तन्त महावारणसंनिभाः ॥ १२॥

जयत्यतिबलो रामो लक्ष्मणश्च महाबलः ।
राजा जयति सुग्रीवो राघवेणाभिपालितः ॥ १३॥

इत्येवं घोषयन्तश्च गर्जन्तश्च प्लवङ्गमाः ।
अभ्यधावन्त लङ्कायाः प्राकारं कामरूपिणः ॥ १४॥

वीरबाहुः सुबाहुश्च नलश्च वनगोचरः ।
निपीड्योपनिविष्टास्ते प्राकारं हरियूथपाः ॥ १५॥

एतस्मिन्नन्तरे चक्रुः स्कन्धावारनिवेशनम् ॥ १६॥

पूर्वद्वारं तु कुमुदः कोटिभिर्दशभिर्वृतः ।
आवृत्य बलवांस्तस्थौ हरिभिर्जितकाशिभिः ॥ १७॥

दक्षिणद्वारमागम्य वीरः शतबलिः कपिः ।
आवृत्य बलवांस्तस्थौ विंशत्या कोटिभिर्वृतः ॥ १८॥

सुषेणः पश्चिमद्वारं गतस्तारा पिता हरिः ।
आवृत्य बलवांस्तस्थौ षष्टि कोटिभिरावृतः ॥ १९॥

उत्तरद्वारमासाद्य रामः सौमित्रिणा सह ।
आवृत्य बलवांस्तस्थौ सुग्रीवश्च हरीश्वरः ॥ २०॥

गोलाङ्गूलो महाकायो गवाक्षो भीमदर्शनः ।
वृतः कोट्या महावीर्यस्तस्थौ रामस्य पार्वतः ॥ २१॥

ऋष्काणां भीमवेगानां धूम्रः शत्रुनिबर्हणः ।
वृतः कोट्या महावीर्यस्तस्थौ रामस्य पार्श्वतः ॥ २२॥

संनद्धस्तु महावीर्यो गदापाणिर्विभीषणः ।
वृतो यस्तैस्तु सचिवैस्तस्थौ तत्र महाबलः ॥ २३॥

गजो गवाक्षो गवयः शरभो गन्धमादनः ।
समन्तात्परिघावन्तो ररक्षुर्हरिवाहिनीम् ॥ २४॥

ततः कोपपरीतात्मा रावणो राक्षसेश्वरः ।
निर्याणं सर्वसैन्यानां द्रुतमाज्ञापयत्तदा ॥ २५॥

निष्पतन्ति ततः सैन्या हृष्टा रावणचोदिताः ।

समये पूर्यमाणस्य वेगा इव महोदधेः ॥ २६ ॥

एतस्मिन्नन्तरे घोरः सङ्ग्रामः समपद्यत ।
रक्षसां वानराणां च यथा देवासुरे पुरा ॥ २७ ॥

ते गदाभिः प्रदीप्ताभिः शक्तिशूलपरश्वधैः ।
निजघ्नुर्वानरान्घोराः कथयन्तः स्वविक्रमान् ॥ २८ ॥

तथा वृक्षैर्महाकायाः पर्वताग्रैश्च वानराः ।
राक्षसास्तानि रक्षांसि नखैर्दन्तैश्च वेगिताः ॥ २९ ॥

राक्षसास्त्वपरे भीमाः प्राकारस्था महीगतान् ।
भिण्डिपालैश्च खड्गैश्च शूलैश्चैव व्यदारयन् ॥ ३० ॥

वानराश्चापि सङ्क्रुद्धाः प्राकारस्थान्महीगताः ।
राक्षसान्पातयामासुः समाप्लुत्य प्लवङ्गमाः ॥ ३१ ॥

स सम्प्रहारस्तुमुलो मांसशोणितकर्दमः ।
रक्षसां वानराणां च सम्बभूवाद्भुतोपमाः ॥ ३२ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com